# 14. हनुमद्वर्णितरामवृत्तान्तः

[In Sanskrit literature, Valmiki is considered the Adikavi. The 'Anushtup' metre (a special kind of metre of 4 padas) which has been used and is still in use in great measure in Sanskrit literature is believed to have been invented by Valmiki. As the Ramayana was composed by him, it is called the 'Adikavya' and as he was a rishi it is also called 'Arshakavya'.

The Ramayana has seven 'Kandas' (chapters). The first Kanda is 'Adikanda' and the last 'Uttarakanda'. It is estimated that there are a total of 24,000 Shlokas in the Ramayana and hence it is also called 'चतुर्विंशति-साहस्री-संहिता'.

In ancient times, when all books were written by hand, the Ramayana too has been written in many scripts. Collecting many such manuscripts from India and abroad, Department of Indology, M.S. University has prepared a free from fault, edited version.

The following verses have been taken from the Sundarakanda of the Ramayana. Hanuman goes to Lanka and meets Sita in Ashoka Vatika. In order to convince Sita that he really is a messanger of Rama, he shows her Rama's ring and also narrates in short the major events of Rama's life so far. During this, he also describes Rama's qualities. We should remember that these qualities have made Rama great and if we are able to imbibe these qualities we too can become great - this is what we have to learn from this lesson.]

राजा दशरथो नाम रथकुञ्जरवाजिमान् ।
पुण्यशीलो महाकीर्तिः ऋजुरासीन्महायशाः ।। 1 ।।
तस्य पुत्रः प्रियो ज्येष्ठस्ताराधिपनिभाननः ।
रामो नाम विशेषज्ञः श्रेष्ठः सर्वधनुष्मताम् ।। 2 ।।



रक्षिता स्वस्य वृत्तस्य स्वजनस्यापि रक्षिता ।
रक्षिता जीवलोकस्य धर्मस्य च परंतपः ॥ 3॥
तस्य सत्याभिसन्धस्य वृद्धस्य वचनात् पितुः ।
सभार्यः सह च भ्रात्रा वीरः प्रव्रजितो वनम् ॥4॥
तेन तत्र महारण्ये मृगयां परिधावता ।
राक्षसा निहताः शूरा बहवः कामरूपिणः ॥ 5॥
जनस्थानवधं श्रुत्वा निहतौ खरदूषणौ ।
ततस्त्वमर्षापहृता जानकी रावणेन तु ॥ 6॥
वञ्चयित्वा वने रामं मृगरूपेण मायया ।
स मार्गमाणस्तां देवीं रामः सीतामनिन्दिताम् ॥ 7॥
आससाद वने मित्रं सुग्रीवं नाम वानरम् ।
ततः स वालिनं हत्वा रामः परपुरंजयः ॥ 8॥
आयच्छत्कपिराज्यं तु सुग्रीवाय महात्मने ।
सुग्रीवेणाभिसंदिष्टा हरयः कामरूपिणः ॥ 9॥
दिक्षु सर्वासु तां देवीं विचिन्वन्तः सहस्रशः ।
अहं संपातिवचनाच्छतयोजनमायतम् ॥ 10॥
तस्या हेतोर्विशालाक्ष्याः समुद्रं वेगवान् प्लुतः ।
विररामैवमुक्त्वा स वाचं वानरपुङ्गवः ॥ 11॥

## Glossary

**Noun : (masc.) :** **कुञ्जरः** elephant **ताराधिपः** king of stars, moon **खरः** name of a demon living in Janasthana **दूषणः** a soldier appointed by Ravana in Janasthana **अमर्षः** anger **सुग्रीवः** king of monkeys **हरिः** monkey **संपातिः** name of the king of vultures, elder brother of Jatayu

**(Fem.) :** **अभिसंधा** pledge **भार्या** wife **मृगया** hunting

**(Neu.) :** **आननम्** face **वृत्तम्** good conduct / behaviour

**Compound :** जनस्थानवधम् (जनस्थाने वधः जनस्थानवधः, तम् । सप्तमी तत्पुरुष) । खरदूषणौ (खरः च दूषणः च, इतरेत्तर द्वन्द्व) । अमर्षापहृता (अमर्षेण अपहृता, तृतीया तत्पुरुष) । मृगरूपेण (मृगस्य रूपम् मृगरूपम्, तेन । षष्ठी तत्पुरुष) । कपिराज्यम् (कपीनाम् राज्यम्, षष्ठी तत्पुरुष) । संपातिवचनात् (संपातेः वचनम् संपातिवचनम्, तस्मात् । षष्ठी तत्पुरुष) । वानरपुङ्गवः (वानरेषु पुङ्गवः, सप्तमी तत्पुरुष) ।

**Participle :** श्रुत्वा (श्रु + त्वा) । वञ्चयित्वा (वञ्च् - (causal) + त्वा) । हत्वा (हन् + त्वा) । उक्त्वा (वच् > उच् + त्वा) ।

## Notes

**(1) Meaning :** **रथकुञ्जरवाजिमान्** having chariots, elephants and horses **पुण्यशीलः** meritorious by nature **ऋजुः** simple **ताराधिप-निभ-आननः** having face like moon **स्वस्य** one's own **वृत्तस्य** of behaviour, of conduct **परंतपः** tormenting enemies (foes)

**सत्याभिसन्धस्य** determined to practise truth **सभार्यः** with wife **प्रव्रजितो वनम्** went to forest **परिधावता** running **कामरूपिणः** assuming form according to one's wish **जनस्थानवधम्** about killing (slaughter) in Janasthana **अमर्षापहृता** kidnapped due to anger and jealously **वञ्चयित्वा** deceiving, cheating **मार्गमाणः** searching **सीतामनिन्दिताम्** to blameless Sita (who is not worthy of being censured) **आससाद** reached, arrived **परपुरंजयः** conquerer of the kingdoms of enemies **सुग्रीवेणाभिसंदिष्टाः** ordered by Surgriva **विचिन्वन्तः** searching **सहस्रशः** thousands **शतयोजनमायतम्** spread over in a hundred Yojans (one Yojan is equal to four miles) **विशालाक्ष्याः** of one having large eyes **प्लुतः** crossed **वानरपुङ्गवः** best of monkeys

**(2) Sandhi :** ऋजुरासीन्महायशाः (ऋजुः आसीत् महायशाः) । ततस्त्वमर्षापहृता (ततः तु अमर्षापहृता) संपातिवचनाच्छतयोजनमायतम् (संपातिवचनात् शतयोजनम् आयतम्) । विररामैवमुक्त्वा (विरराम एवम् उक्त्वा) ।

## Exercises

**1. विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) रामवृत्तान्तं कः वर्णयति ? ◯

(क) दशरथः (ख) सुग्रीवः (ग) हनुमान् (घ) सीता

(2) ताराधिपः कः ? ◯

(क) सूर्यः (ख) रामः (ग) शुक्रः (घ) चन्द्रः

(3) कामरूपिणः के आसन् ? ◯

(क) राक्षसाः (ख) देवाः (ग) वानराः (घ) अरण्यवासिनः

(4) 'कुञ्जरः' शब्दस्य पर्यायः कः ? ◯

(क) गजः (ख) कूजनम् (ग) कंकरः (घ) काकः

(5) आयतम् शब्दस्य कः अर्थः ? ◯

(क) दीर्घम् (ख) न्यूनम् (ग) विस्तृतम् (घ) सीमितम्

(6) जानकी केन अपहृता ? ◯

(क) खरेण (ख) रावणेन (ग) दूषणेन (घ) विभीषणेन

**2. अनुनासिकं परसवर्णत्वेन परिवर्त्य लिखत ।**

**उदाहरणम् :** वर्गसहितम् अनुनासिकपदं लिखत ।

| | | | | | |
|---|---|---|---|---|---|
| | क-वर्गः | <u>पुंगवः</u> | | क-वर्गः | <u>पुङ्गवः</u> |
| (1) कुंजरः | .................... | .................... | (2) अभिसंधः | .................... | .................... |
| (3) वंचयित्वा | .................... | .................... | (4) पुरंजयः | .................... | .................... |
| (5) संदिष्टः | .................... | .................... | | | |

**3. अधोलिखितानां कृदन्तानां प्रकारं लिखत ।**

(1) श्रुत्वा .................... (2) उक्त्वा ....................

(3) हत्वा ....................

4. **रेखाङ्कितपदानि आधृत्य प्रश्नवाक्यं रचयत ।**

(केन, कः, कुत्र)

(1) <u>दशरथः</u> पुण्यशीलः आसीत् ।

(2) <u>रामेण</u> महारण्ये राक्षसाः निहताः ।

(3) सः वीरः <u>वनं</u> प्रव्रजितः ।

5. **उदाहरणानुसारं शब्दरूपाणां परिचयं कारयत ।**

| | शब्दरूपम् | मूलशब्दः | अन्तः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| उदा. | धर्मस्य | धर्म | अकारान्तः | पुल्लिङ्गम् | षष्ठी | एकवचनम् |
| (1) | मृगयाम् | .................... | .................... | .................... | .................... | .................... |
| (2) | बहवः | .................... | .................... | .................... | .................... | .................... |
| (3) | मायया | .................... | .................... | .................... | .................... | .................... |
| (4) | विशालाक्ष्याः | .................... | .................... | .................... | .................... | .................... |
| (5) | वृद्धस्य | .................... | .................... | .................... | .................... | .................... |

### Activity

- Collect brief information about main characters of Ramayana.
- Get acquainted with main events of Ramayana.
- Make a list of Rama's qualities.

●